# पुरुष सूक्तम्  puruṣa sūktam

ॐ तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये । दैवीस्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः।

om taccham yorāvṛṇīmahe| gātum yajñāya | gātum yajñapataye|

daivīsvastirastu naḥ | svastirmānuṣebhyaḥ |

ऊर्ध्वं जिगातु भेषजम्। शंनो अस्तु द्विपदे। शं चतुष्पदे। ॐ शान्तिः शान्तिः शान्तिः।

ūrdhvam jigātu bheṣajam | śanno astu dvipade | śam catuṣpade |

om śāntiḥ śāntiḥ śāntiḥ |

सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम्॥

sahasraśīrṣā puruṣaḥ | sahasrākṣaḥ sahasrapāt | sa bhūmim viśvato vṛtvā

atyatiṣṭaddaśāṅgulam ||

सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम्॥

sahasraśīrṣā puruṣaḥ | sahasrākṣaḥ sahasrapāt | sa bhūmim viśvato vṛtvā

atyatiṣṭaddaśāṅgulam ||

पुरुष एवेदगं सर्वम्। यद्भूतं यच्च भव्यम्। उतामृतत्वस्येशानः। यदन्नेनातिरोहति।

puruṣa evedagm sarvam | yadbhūtam yacca bhavyam|

utāmṛtatvasyeśānaḥ | yadannenātirohati |

एतावानस्य महिमा। अतो ज्यायागंश्च पूरुषः। पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि।

etāvānasya mahimā | ato jyāyāgṁśca pūruṣaḥ | pādo'sya viśvā bhūtāni |

tripādasyāmṛtaṁ divi |

त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाऽऽभवात्पुनः। ततो विष्वङ्व्यक्रामत्। साशनानशने अभि।

tripādūrdhva udaitpuruṣaḥ | pādo'syehā''bhavātpunaḥ |

tato viṣvaṅvyakrāmat | sāśanānaśane abhi |

तस्माद्विराडजायत। विराजो अधि पूरुषः। स जातो अत्यरिच्यत। पश्चवाद्भूमिमथो पुरः।

tasmādvirāḍajāyata | virājo adhi pūruṣaḥ | sa jāto atyaricyata |

paścavādbhūmimatho puraḥ |

यत्पुरुषेण हविषा। देवा यज्ञमतन्वत। वसन्तो अस्यासीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः।

yatpuruṣeṇa haviṣā | devā yajñamatanvata | vasanto asyāsīdājyam |

grīṣma idhmaśśaraddhaviḥ |

सप्तास्यासन्परिधयः। त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाः। अबध्नन्पुरुषं पशुम्।

saptāsyāsanparidhayaḥ | triḥ sapta samidhaḥ kṛtāḥ | devā yadyajñaṁ

tanvānāḥ | abadhnanpuruṣaṁ paśum |

तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जातमग्रतः। तेन देवा अयजन्त। साध्या ऋषयश्च ये।

taṁ yajñaṁ barhiṣi praukṣan | puruṣaṁ jātamagrataḥ | tena devā ayajanta |

sādhyā ṛṣayaśca ye |

तस्माद्यज्ञात्सर्वहुतः। संभृतं पृषदाज्यम्। पशूगंस्तागंश्चक्रे वायव्यान्। आरण्यान्ग्राम्याश्च ये।

tasmādyajñātsarvahutaḥ | sambhṛtaṁ pṛṣadājyam | paśūgṁstāgṁścakre vāyavyān | āraṇyāngrāmyāśca ye |

तस्माद्यज्ञात्सर्वहुतः। ऋचः सामानि जज्ञिरे। छन्दागंसि जज्ञिरे तस्मात्। यजुस्तस्मादजायत।

tasmādyajñātsarvahutaḥ| ṛcaḥ sāmāni jajñire | chandāgṁsi jajñire tasmāt | yajustasmādajāyata |

तस्मादश्वा अजायन्त। ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः।

tasmādaśvā ajāyanta | ye ke cobhayādataḥ | gāvo ha jajñire tasmāt | tasmājjātā ajāvayaḥ |

यत्पुरुषं व्यदधुः। कतिधा व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते।

yatpuruṣaṁ vyadadhuḥ | katidhā vyakalpayan | mukhaṁ kimasya kau bāhū | kāvūrū pādāvucyete |

ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः। पद्भ्यागं शूद्रो अजायत।

brāhmaṇo'sya mukhamāsīt | bāhū rājanyaḥ kṛtaḥ | ūrū tadasya yadvaiśyaḥ | padbhyāgṁ śūdro ajāyata |

चन्द्रमा मनसो जातः। चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत।

candramā manaso jātaḥ | cakṣoḥ sūryo ajāyata | mukhādindraścāgniśca |

prāṇādvāyurajāyata |

नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकागं

अकल्पयन्।

nābhyā āsīdantarikṣam | śīrṣṇo dyauḥ samavartata | pad bhyāṁ bhūmirdiśaḥ śrotrāt | tathā lokāgm akalpayan |

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तुपारे। सर्वाणि रूपाणि विचित्य धीरः।

नामानि कृत्वाऽभिवदन् यदास्ते।

vedāhametaṁ puruṣaṁ mahāntam | ādityavarṇaṁ tamasastupāre | sarvāṇi rūpāṇi vicitya dhīraḥ | nāmāni kṛtvā'bhivadan yadāste |

धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति।

नान्यः पन्था अयनाय विद्यते।

dhātā purastādyamudājahāra | śakraḥ pravidvānpradiśaścatasraḥ | tamevaṁ vidvānamṛta iha bhavati | nānyaḥ panthā ayanāya vidyate |

यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते। यत्र पूर्वे साध्याः

सन्ति देवाः।

yajñena yajñamayajanta devāḥ | tāni dharmāṇi prathamānyāsan | te ha nākaṁ mahimānaḥ sacante | yatra pūrve sādhyāḥ santi devāḥ |

अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तताधि। तस्य त्वष्टा विदधद्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे।

adbhyaḥ sambhūtaḥ pṛthivyai rasācca | viśvakarmaṇaḥ samavartatādhi | tasya tvaṣṭā vidadhadrūpameti | tatpuruṣasya viśvamājānamagre |

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय॥

vedāhametaṁ puruṣaṁ mahāntam | ādityavarṇaṁ tamasaḥ parastāt | tamevaṁ vidvānamṛta iha bhavati | nānyaḥ panthā vidyate'yanāya ||

प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते। तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः॥

prajāpatiścarati garbhe antaḥ | ajāyamāno bahudhā vijāyate | tasya dhīrāḥ parijānanti yonim | marīcīnāṁ padamicchanti vedhasaḥ ||

यो देवेभ्य आतपति। यो देवानां पुरोहितः। पुर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये।

yo devebhya ātapati| yo devānāṁ purohitaḥ | purvo yo devebhyo jātaḥ | namo rucāya brāhmaye |

रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन् वशे।

rucaṁ brāhmaṁ janayantaḥ | devā agre tadabruvan| yastvaivaṁ

brāhmaṇo vidyāt | tasya devā asan vaśe |

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण।

hrīśca te lakṣmīśca patnyau | ahorātre pārśve | nakṣatrāṇi rūpam | aśvinau vyāttam | iṣṭaṁ maniṣāṇa | amuṁ maniṣāṇa | sarvaṁ maniṣāṇa |

ॐ तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये । दैवीस्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः।

om tacchaṁ yorāvṛṇīmahe | gātuṁ yajñāya | gātuṁ yajñapataye| daivīsvastirastu naḥ | svastirmānuṣebhyaḥ |

ऊर्ध्वं जिगातु भ्वेषजम्। शंनो अस्तु द्विपदे। शं चतुष्पदे। ॐ शान्तिः शान्तिः शान्तिः।

ūrdhvaṁ jigātu bheṣajam | śanno astu dvipade | śaṁ catuṣpade |

om śāntiḥ śāntiḥ śāntiḥ |

* * * * * * * * * * * * * * * * * * * * * *